# आदर्शप्रश्नपत्र-प्रारूपम्
## 29, 30 अगस्त, 2024
## कक्षा दशमी
## विषयः संस्कृतम्

**समयः होरात्रयम्** **पूर्णांकाः 80**

| | | |
|---|---|---|
| | **खण्ड 'क'**<br>**बहुविकल्पात्मक-प्रश्नाः** | 16<br>अङ्काः |
| **प्रश्न-1.** | **अधोलिखित-षोडश-प्रश्नानाम् उत्तराणि प्रदत्तेभ्यः विकल्पेभ्यः चिनुत।**<br>**1. शेमुषी (द्वितीयो-भागः) इत्यस्य पञ्चमः पाठः कः?**<br>(1) जननी तुल्यवत्सला (2) सुभाषितानि<br>(3) सौहार्दं प्रकृतेः शोभा (4) विचित्रः साक्षी<br>**2. बुद्धिमती .......... व्याघ्रं ददर्श?**<br>(1) भामिनी (2) जम्बुकम्<br>(3) नगरे (4) गहनकानने<br>**3. अम्भोदाः कुत्र सन्ति?**<br>(1) गगने (2) मेघे<br>(3) चातके (4) सरसि<br>**4. मयूरः ................. इति नाम्नाऽपि ज्ञायते ।**<br>(1) स्थितप्रज्ञः (2) अहिभुक्<br>(3) आत्मश्लाघाहीनः (4) पिकः<br>**5. 'अत्तुम' इत्यस्य शब्दस्य कोऽर्थः?**<br>(1) पठितुम् (2) खादितुम्<br>(3) आविष्कर्तुम् (4) गन्तुम्<br>**6. <u>अत्यादरः</u> शङ्कनीयः।**<br>(1) अत्य+आदरः (2) अति+आदरः<br>(4) अत्या+दरः (4) अत्+यादरः<br>**7. मृतं पुत्रं दृष्ट्वा माता <u>सकरुणम्</u> विलपति।**<br>(1) करुणया सह (2) करुणायाः समीपम्<br>(3) करुणायाः पश्चात् (4) करुणाम् अनतिक्रम्य<br>**8. राहुलः प्रातर्भ्रमणाय <u>6:15</u> उद्यानं गच्छति ।**<br>(1) षड्वादने (2) सार्ध-षड्वादने<br>(3) पादोन-षड्वादने (4) सपाद-षड्वादने<br>**9. .......... ऋतवः सन्ति।**<br>(1) षड् (2) षड्वः<br>(3) षडानि (4) षडाः | 1×16=16 |

| | | |
|---|---|---|
| | **10. सः <u>पौराणिकं</u> मङ्गलाचरणं करोति।**<br>(1) पुराण+इकम् (2) पौराणिक+तल्<br>(3) पुराण+ठक् (4) पौराणिक+टाप्<br>**11. अम्बा भोजनं पचति।**<br>(1) अम्बा भोजनं पच्यते। (2) अम्बया भोजनं पच्यते।<br>(3) अम्बया भोजनः पच्यते। (4) अम्बया भोजनं पचति।<br>**12. सायंकाले <u>अनेकानि</u> मानवाः भ्रमन्ति ।**<br>(1) अनेके (2) अनेकाः<br>(3) अनेकम् (4) अनेकः<br>**13. वयम् इत्यस्य पद-परिचयम्-**<br>(1) अस्मद् शब्दः, प्रथमा विभक्तिः, बहुवचनम्<br>(2) युष्मद् शब्दः, द्वितीया विभक्तिः, बहुवचनम्।<br>(3) अस्मद् शब्दः, द्वितीया विभक्तिः, बहुवचनम्।<br>(4) युष्मद् शब्दः, प्रथमा विभक्तिः, बहुवचनम्।<br>**14. <u>अभवत</u> इत्यस्य पद-परिचयम्-**<br>(1) भू धातोः, लङ्लकारः, प्रथम-पुरुषः, एकवचनम्।<br>(2) भू धातोः, लङ्लकारः, मध्यम-पुरुषः, बहुवचनम्।<br>(3) भव् धातोः, लङ्लकारः, मध्यम-पुरुषः, बहुवचनम्।<br>(4) भव् धातोः, लङ्लकारः, प्रथम-पुरुषः, एकवचनम्।<br>**15. ............... फलेषु कदाचन।**<br>(1) खलु (2) पुरा<br>(3) मा (4) ह्यः<br>16. **संस्कृते ............... लिङ्गानि सन्ति।**<br>(1) त्रयः (2) तिस्रः<br>(3) त्रीणि (4) चत्वारि | |
| | **खण्ड 'ख'**<br>**अपठित-अवबोधनम्** | **10 अङ्काः** |
| **प्रश्न-2.** | **अधोलिखितम् अनुच्छेदम् अधिकृत्य निर्देशित-प्रश्नानाम् उत्तराणि दीयन्ताम्।**<br>भारतवर्षे बहूनि दर्शनीयानि तीर्थस्थानानि सन्ति। यानि दृष्ट्वा जीवनं पवित्रं भवति, मनः च प्रसन्नं भवति। तेषु एव तीर्थस्थानेषु एकं तीर्थस्थानमस्ति कन्याकुमारी। इदं तीर्थस्थानं भारतस्य दक्षिणे कोणे विराजते। देव्याः कन्या-कुमार्याः सान्निध्येन पावनमिदं तीर्थस्थानम्। अरबसागर-हिन्दमहासागराभ्यां परिवृतं स्थानमिदं प्राकृतिक-सौन्दर्यपरिपूर्णं वर्तते। तत्र स्थित्वा सूर्योदयस्य सूर्यास्तस्य च दृश्यं द्रष्टुं सुकरं भवति। पूर्णिमायां तिथौ तु सायं पूर्वस्यां दिशि चन्द्रोदयः पश्चिमायां च सूर्यास्तं युगपदेव अवलोक्यते। तत्र पर्यटितुं क्रीडितुं वा विस्तृतं समुद्रतटं वर्तते।<br>**(1) एकपदेन उत्तरत –**<br>**(क)** भारतस्य दक्षिणे कोणे किम् तीर्थस्थानं वर्तते? | **1×2=2** |

| | | |
|---|---|---|
| | (ख) कस्याः सान्निध्येन पावनमिदं तीर्थस्थानम्?<br>**(2) पूर्णवाक्येन उत्तरत –**<br>**(क)** कस्य दर्शनं युगपदमेव भवति?<br>**(3) निर्देशानुसारं उत्तरत –**<br>**(क) 'भारतवर्षे बहूनि दर्शनीयानि तीर्थस्थानानि सन्ति'** अत्र **क्रियापदं** किम्?<br>**(ख) 'जीवनं पवित्रम्'** इत्यनयोः पदयोः **विशेष्यपदं** किम्? | 1×1=1<br><br>1×2=2 |
| प्रश्न–3. | **अधोलिखितम् अनुच्छेदं पठित्वा अनुच्छेदाधारित-प्रश्नानाम् उत्तराणि दीयन्ताम्।**<br>वाल्मीकिः लौकिक-संस्कृतसाहित्यस्य आदिकविः मन्यते। तस्य रामायणं च आदिकाव्यं मन्यते। रामायणस्य रचनायाः कथा विलक्षणा अस्ति। कथ्यते यत् एकदा वाल्मीकिः तमसातीरे भ्रमन् आसीत्। अकस्मात् तस्य दृष्टिः एकेन व्याधेन शरेण विध्यमाने क्रौञ्चे अपतत्। एतत् कारुणिकं दृश्यं दृष्टवा सहसा वाल्मीकेः कण्ठात् एषा वाणी निःसृता। "मा निषाद प्रतिष्ठां त्वमगमः शाश्वतीः समाः यत्क्रौञ्च-मिथुनादेकमवधीः काममोहितम्"।<br>**(1) आदिकाव्यं किं मन्यते? (एकपदेन उत्तरत)**<br>**(2) वाल्मीकिः कस्य आदिकविः मन्यते? (पूर्णवाक्येन उत्तरत)**<br>**(3) गद्यांशं पठित्वा तृतीयांशतुल्यं सारं लिखत।**<br>**(4) प्रदत्त-गद्यांशस्य उचितं शीर्षकं लिखत।** | <br><br><br><br><br><br><br>1×1=1<br>1×1=1<br>1×2=2<br>1×1=1 |
| | **खण्ड 'ग'**<br>**रचनात्मक-कार्यम्** | 10 अङ्काः |
| प्रश्न–4. | **मञ्जूषातः पदानि विचित्य रिक्तस्थानानि पूरयित्वा स्व-अनुजस्य कृते पत्रं लिखत।**<br>**आसीः, सम्मानजनकं, एव, भ्रातः, प्राप्तम्, पितरौ, पठित्वा, कथयामि, अद्य, परीक्षा।**<br>परीक्षा भवनम्<br>प्रियः (1) ............... रमेशः,<br>सस्नेहं नमस्कारं (2) ............... । मया (3) ............... तव पत्रं (4) ...............। पत्रं (5) ............... महद् दुःखम् जातम्। परीक्षाकाले त्वम् ज्वरग्रस्तः (6) ...............। रुग्णः सन् अपि त्वया (7) ...............दत्ता। परीक्षायां (8) ............... स्थानमपि प्राप्तम्। एतत् तव परिश्रमस्य (9)............... फलम्। अहं त्वयि गर्वं अनुभवामि। (10) ............... प्रति मम प्रणामः।<br>भवतः अग्रजः,<br>रामः। | ½×10=5 |
| | | |

| | | |
|---|---|---|
| प्रश्न-5. | **अधोलिखितेषु विषयेषु एकं विषयम् अधिकृत्य संस्कृत-भाषायां लघुनिबन्धं लिख्यन्ताम्।**<br>**(क)** मम प्रियं मित्रम्<br>**(ख)** हिमाचल-प्रदेशः<br>**(ग)** मम प्रियः अध्यापकः | 5×1=5 |
| | **खण्ड 'घ'**<br>**अनुप्रयुक्त-व्याकरणम्** | **24 अङ्काः** |
| प्रश्न-6. | **अधोलिखितवाक्येषु रेखाङ्कितपदानां प्रकृति-प्रत्ययौ संयोज्य विभज्य वा उचितम् उत्तरं लिखत।**<br>**(क)** <u>**बुद्धि+मतुप्**</u> नराः विचारशीलाः भवन्ति।<br>**(ख)** मनसः <u>**चञ्चलता**</u> वानरस्य इव भवति।<br>**(ग)** <u>**मुद्+शानच्**</u> ते गायन्ति।<br>**(घ)** सिंहः मृगं <u>**खादितुम्**</u> इच्छति।<br>**(ङ)** <u>**श्रीमती**</u> रमा दीपं प्रज्वालयति। | 1×5=5 |
| प्रश्न-7. | **अधोलिखितानां कालबोधक-शब्दानां संस्कृत-पदेषु परिवर्तनं कुरुत।**<br>**(क)** 8:00<br>**(ख)** 4:45<br>**(ग)** 7:30 | 1×3=3 |
| प्रश्न-8. | **अधोलिखित-पदेषु त्रयाणां पदानां सन्धिपदं सन्धिविच्छेदपदं वा लिखत।**<br>**(क)** पदातिरेव<br>**(ख)** शरीरोपचयः<br>**(ग)** क्षणेन + एव<br>**(घ)** ध्यान + अवस्थाम् | 1×3=3 |
| प्रश्न-9 | **अधोलिखित-वाक्येषु त्रयाणां वाक्यानां वाच्यस्य नियमानुगुणं समुचितं वाच्य-परिवर्तनं कुरुत।**<br>**(क)** देवः वनं गच्छति।<br>**(ख)** सज्जनैः उपविश्यते।<br>**(ग)** सा सिंहं पश्यति।<br>**(घ)** रामः पुस्तकं पठति । | 1×3=3 |
| प्रश्न-10. | **अधोलिखित-पदेषु चतुर्पदानां समुचितं पद-परिचयं विधीयन्ताम्।**<br>मोहनैः, तस्मात्, भानवे, द्रक्ष्यामः, अचलत, रक्षामि। | ½×4=2 |
| प्रश्न-11. | **अधोलिखित-वाक्येषु लिङ्गाधारित-सङ्ख्या-वाचक-पदानि प्रदत्तेभ्यः विकल्पेभ्यः चिनुत।**<br>**(क)** पुस्तकालये.......... मित्रे पठतः। (द्वे/द्वौ/द्वये)<br>**(ख)** तस्य........... भ्रातरः सन्ति। चत्वारः/चत्वारि/चत्वाराः)<br>**(ग)** सः.......... फलानि अखादत्। (त्रयः/तिस्रः/त्रीणि)<br>**(घ)** पाण्डवाः........... आसन्। (पञ्चाः/पञ्च/ पञ्चमाः) | ½×4=2 |

| | | |
|---|---|---|
| **प्रश्न-12.** | **अधोलिखितवाक्येषु रेखाङ्कितपदानां समस्तपदं विग्रहपदं वा प्रदत्त-विकल्पेभ्यः चिनुत।**<br>**(क)** रामः **यथाविधिं** कार्यं करोति।<br>**(ख)** **माता च पिता च** वन्दनीयौ।<br>**(ग)** **नीलः कण्ठः यस्य सः** महेशः कथ्यते।<br>**(घ)** रामः **राज्ञः पुत्रः** आसीत्। | **½×4=2** |
| **प्रश्न-13.** | **अधोलिखित-अशुद्ध-वाक्यानाम् अशुद्धि-संशोधनं कुरुत।**<br>**(क)** सः राधिका अस्ति।<br>**(ख)** सायंकाले अनेकानि मानवाः भ्रमन्ति।<br>**(ग)** श्वः नदीतीरे वनमहोत्सवः भविष्यसि।<br>**(घ)** वेदाः चतुरः सन्ति। | **½×4=2** |
| **प्रश्न-14.** | **मञ्जूषातः अव्यय-पदानि विचित्य रिक्तस्थानानि पूरयत।**<br>**तथा, ह्यः, विना, मा**<br>**(1)** ............... फलेषु कदाचन।<br>**(2)** विद्यां ............... जीवनं व्यर्थम्।<br>**(3)** ............... शनिवासरः आसीत्।<br>**(4)** यथा राजा ............... प्रजा। | **½×4=2** |
| | **खण्ड 'ङ'**<br>**पठित-अवबोधनम्** | **20 अङ्काः** |
| **प्रश्न-15.** | **पठित-गद्य-पद्य-आधारित-अवबोधनकार्यम्-** | |
| **(अ)** | **अधोलिखित-पठित-अनुच्छेदम् अधिकृत्य निर्देशित-प्रश्नानाम् उत्तराणि दीयन्ताम्।**<br>कश्चन निर्धनो जनः भूरि परिश्रम्य किञ्चिद् वित्तमुपार्जितवान्। तेन वित्तेन स्वपुत्रम् एकस्मिन् महाविद्यालये प्रवेशं दापयितुं सफलो जातः। तत्तनयः तत्रैव छात्रावासे निवसन् अध्ययने संलग्नः समभूत्। एकदा स पिता तनूजस्य रुग्णतामाकर्ण्य व्याकुलो जातः पुत्रं द्रष्टुं च प्रस्थितः। परमर्थकार्श्येन पीडितः स बसयानं विहाय पदातिरेव प्राचलत्। पदातिक्रमेण संचलन् सायं समयेऽप्यसौ गन्तव्याद् दूरे आसीत्। 'निशान्धकारे प्रसृते विजने प्रदेशे पदयात्रा न शुभावहा', एवं विचार्य स पार्श्वस्थिते ग्रामे रात्रिनिवासं कर्तुं कञ्चिद् गृहस्थमुपागतः। करुणापरो गृही तस्मै आश्रयं प्रायच्छत्।<br>**(1) एकपदेन उत्तरत –**<br>**(क)** निर्धनो जनः केन पीडितः आसीत्?<br>**(ख)** पिता कस्य रुग्णताम् आकर्ण्य व्याकुलो जातः?<br>**(2) पूर्णवाक्येन उत्तरत –**<br>**(क)** निर्धनो जनः कथं वित्तम् उपार्जितवान्? | <br><br><br><br><br><br><br><br><br><br>**1×2=2**<br><br><br>**1×1=1** |

| | | |
|---|---|---|
| | **(3) निर्देशानुसारं उत्तरत –**<br>**(क)** "छात्रावासे" इत्यत्र का विभक्तिः?<br>**(ख)** 'कर्तुम्' इत्यत्र कः प्रत्ययः? | 1×2=2 |
| (आ) | **अधोलिखितम् पद्यांशम् अधिकृत्य निर्देशित-प्रश्नानाम् उत्तराणि दीयन्ताम्।**<br>**उदीरितोऽर्थः पशुनापि गृह्यते,**<br>**हयाश्च नागाश्च वहन्ति बोधिताः।**<br>**अनुक्तमप्यूहति पण्डितो जनः,**<br>**परेङ्गितज्ञानफला हि बुद्धयः॥**<br>**(1) एकपदेन उत्तरत –**<br>**(क)** परेङ्गितज्ञानफला काः?<br>**(ख)** पशुनापि कः गृह्यते?<br>**(2) पूर्णवाक्येन उत्तरत –**<br>**(क)** उदीरितोऽर्थः केन गृह्यते?<br>**(3) निर्देशानुसारं उत्तरत –**<br>**(क)** "उक्तम्" इति पदस्य अत्र विलोमपदं किम्?<br>**(ख)** "उदीरितोऽर्थः" इत्यत्र विशेष्यपदं किम् ? | <br><br><br><br><br>1×2=2<br><br><br>1×1=1<br><br>1×2=2 |
| प्रश्न-16. | **पठित-गद्य-पद्ययोः हिन्दी-भाषायाम् अनुवादः।** | |
| (अ) | **अधोलिखित-गद्यांशयोः कस्यचिद् एकस्य गद्यांशस्य हिन्दी-भाषायाम् अनुवादं विधीयन्ताम् ।**<br>**(क)** भो वासव पुत्रस्य दैन्यं दृष्ट्वा अहं रोदिमि। सः दीन इति जानन्नपि कृषकः तं बहुधा पीडयति। सः कृच्छ्रेण भारमुद्वहति। इतरमिव धुरं वोढुं सः न शक्नोति। एतत् भवान् पश्यति न? इति प्रत्यवोचत्- "भद्रे! नूनम्। सहस्राधिकेषु पुत्रेषु सत्स्वपि तव अस्मिन्नेव एतादृशं वात्सल्यं कथम्?<br><br>**(ख)** वनस्य दृश्यं समीपे एवैका नदी वहति। एकः सिंहः सुखेन विश्राम्यते तदैव एकः वानरः आगत्य तस्य पुच्छं धुनाति। क्रुद्धः सिंहः तं प्रहर्तुमिच्छति परं वानरस्तु कूर्दित्वा वृक्षमारूढः। तदैव अन्यस्मात् वृक्षात् अपरः वानरः सिंहस्य कर्णमाकृष्य पुनः वृक्षोपरि आरोहति। एवमेव वानराः वारं वारं सिंहं तुदन्ति । क्रुद्धः सिंहः इतस्ततः धावति, गर्जति परं किमपि कर्तुमसमर्थः एव तिष्ठति। | 3×1=3 |
| (आ) | **अधोलिखित-पद्यांशयोः कस्यचिद् एकस्य पद्यांशस्य हिन्दी-भाषायाम् अनुवादं विधीयन्ताम् ।**<br>**(क)** एक एव खगो मानी वने वसति चातकः ।<br>पिपासितो वा म्रियते याचते वा पुरन्दरम् ॥<br><br>**(ख)** आचारः प्रथमो धर्मः इत्येतद् विदुषां वचः।<br>तस्माद् रक्षेत् सदाचारं प्राणेभ्योऽपि विशेषतः ॥ | 3×1=3 |

| | | |
|---|---|---|
| **प्रश्न-17.** | **रेखाङ्कितपदमाधृत्य अधोलिखित-वाक्यानां प्रश्ननिर्माणं कुरुत।**<br>**(क)** सिंहः वानराभ्यां **स्वरक्षायाम्** असमर्थः एवासीत्।<br>**(ख)** गजः वन्यपशून् तुदन्तं **शुण्डेन** पोथयित्वा मारयति।<br>**(ग)** वानरः आत्मानं **वनराजपदाय** योग्यः मन्यते।<br>**(घ)** मयूरस्य नृत्यं **प्रकृतेः** आराधना। | **½×4= 2** |
| **प्रश्न-18.** | **अधोलिखित-विलोमपदानाम् उचित-मेलनं कुरुत।**<br>**(क)** प्रसीदति — निर्बलः<br>**(ख)** मूर्खः — दुर्लभः<br>**(ग)** बली — अवसीदति<br>**(घ)** सुलभः — पण्डितः | **½×4= 2** |

*****************************************************************************************

**प्रश्ननिर्माणकर्ता अशुद्धिसंशोधकश्च**

**आचार्य नरेश मलोटिया**
**टीजीटी-संस्कृतम्**

**राजकीय-उत्कृष्ट-वरिष्ठ-माध्यमिक-विद्यालयः (कन्या) नादौनः**
**डाकगृहम्- नादौनः, मण्डलम्- नादौनः, जनपदः- हमीरपुरः**
**(हिमाचल प्रदेशः)- 177033**

**दूरवाणी- सङ्केतः- 9817707260, 8351007260**
**अणु-सङ्केतः ggsssnadaun@rediffmail.com**

**डॉ. अमन शर्मा**
**टीजीटी-संस्कृतम्**

**राजकीय-उच्च-विद्यालयः चामुक्खा**
**डाकगृहम्- चामुक्खा, मण्डलम्- रक्कड़ः, जनपदः- काङ्गड़ा**
**(हिमाचल प्रदेशः)- 177033**

**दूरवाणी- सङ्केतः- 8894337243, 8219973147**
**अणु-सङ्केतः ghschamukha123@gmail.com**

**आदर्शप्रश्नपत्र-प्रारूप-रूपरेखा**

**29, 30 अगस्त, 2024**

**कक्षा दशमी**

**विषयः संस्कृतम्**

**समयः होरात्रयम्** **पूर्णांकाः 80**

## खण्डविभाजनम्

| | | |
|---|---|---|
| खण्ड 'क' | "बहुविकल्पात्मक-प्रश्नाः" | 16 अङ्काः |
| खण्ड 'ख' | "अपठित-अवबोधनम्" | 10 अङ्काः |
| खण्ड 'ग' | "रचनात्मक-कार्यम्" | 10 अङ्काः |
| खण्ड 'घ' | "अनुप्रयुक्त-व्याकरणम्" | 24 अङ्काः |
| खण्ड 'ङ' | "पठित-अवबोधनम्" | 20 अङ्काः |
| | कुल-अङ्काः | 80 अङ्काः |

| | | |
|---|---|---|
| | **खण्ड 'क'**<br>**बहुविकल्पात्मक-प्रश्नाः** | **16 अङ्काः** |
| **प्रश्न-1.** | **प्रथमे प्रश्ने षोडश बहुविकल्पात्मक-प्रश्नाः भविष्यन्ति, तत्रापि पञ्च प्रश्नाः "शेमुषी द्वितीयो भागः" इत्येतम् अधिकृत्य, दश प्रश्नाः व्याकरणम् अनुसृत्य तथा च एकं प्रश्नं संस्कृतस्य सामान्य- बिन्दूनां विषये भविष्यति।**<br>**बहुविकल्पात्मक-प्रश्नाः**<br>**(1) 1 तः 5 प्रश्नपर्यन्तम् "शेमुषी द्वितीयो भागः"**<br>प्रथमः प्रश्नः पाठस्य नाम, द्वौ प्रश्नौ प्रथम-पाठतः पञ्चम-पाठ-पर्यन्तं प्रदत्त-अभ्यासेभ्यः तथा च द्वौ प्रश्नौ षष्ठ-पाठतः दशम-पाठ-पर्यन्तं प्रदत्त-अभ्यासेभ्यः भविष्यन्ति। अत्र द्वौ प्रश्नौ सामान्यतः कठिनौ भवेताम्।<br><br>**(2) 6 तः 15 प्रश्नपर्यन्तम् "व्याकरण-भागः"**<br>सन्धि- समास- काल- संख्या- प्रत्यय- वाच्य- शुद्धाशुद्ध- शब्दपरिचय- धातुपरिचय- अव्ययाधारित दश प्रश्नाः भविष्यन्ति।<br><br>**(3) षोडशः प्रश्नः "सामान्य संस्कृतम्"**<br>संस्कृतस्य मूलभूत-परिचयात्मक-बिन्दूनां ज्ञानम् (लिङ्ग- विभक्ति- वचन- पुरुष- कारकादि) | **1×16=16** |
| | **खण्ड 'ख'**<br>**अपठित-अवबोधनम्**<br>**(अपठित-सरलगद्यांश-आधारित-कार्यम् :- गद्यांशद्वयम्)** | **10 अङ्काः** |

| | | |
|---|---|---|
| **प्रश्न-2.** | **40-50 शब्द-परिमितः एकः अपठितः सरल-गद्यांशः**<br>(1) एकपदेन प्रश्नोत्तर-द्वयम्<br>(2) पूर्णवाक्येन प्रश्नोत्तरम्<br>(3) भाषिक-कार्यम् (निर्देशानुसार-प्रश्नोत्तर-द्वयम्) | <br>**1×2=2**<br>**1×1=1**<br>**1×2=2** |
| | **भाषिक-कार्यम् =>**<br>वाक्ये क्रियापद-चयनं, कर्तृक्रिया-अन्वितिः, विशेषण-विशेष्य-अन्वितिः, सञ्ज्ञास्थाने सर्वनाम-प्रयोगः, सर्वनामस्थाने सञ्ज्ञा-प्रयोगः, पर्यायपदं विलोमपदं वा दत्त्वा अनुच्छेदे प्रदत्तं पद-चयनं, पद-परिचयः, सन्धिं/सन्धि-विच्छेदं वा, समस्त-पदानां विग्रहः विग्रह-पदानां च समासः, प्रकृति-प्रत्ययौ, उपसर्ग-चयनञ्च। | |
| **प्रश्न-3.** | **80-100 शब्द-परिमितः एकः अपठितः सरल-गद्यांशः (सरलकथा प्रसिद्ध-घटना वर्णनं वा)**<br>(1) एकपदेन प्रश्नोत्तर-द्वयम्<br>(2) पूर्णवाक्येन प्रश्नोत्तरम्<br>(3) गद्यांशस्य तृतीयांश-तुल्यं सारम्<br>(4) गद्यांशस्य समुचित-शीर्षकम् | <br><br>**1×1=1**<br>**1×1=1**<br>**2×1=2**<br>**1×1=1** |
| | **खण्ड 'ग'**<br>**रचनात्मक-कार्यम्** | **10 अङ्काः** |
| **प्रश्न-4.** | **सङ्केताधारित-अनौपचारिक-पत्रम्** | **½×10=5** |
| **प्रश्न-5.** | **निबन्ध-लेखनम् (अनुच्छेद-लेखनम्)** | **5×1=5** |
| | **खण्ड 'घ'**<br>**अनुप्रयुक्त-व्याकरणम्** | **24 अङ्काः** |
| **प्रश्न-6.** | **प्रत्ययाः (पञ्च प्रकृति-प्रत्ययानां संयोजनम् / विभाजनञ्च)**<br>(1) **कृदन्ताः** - तव्यत्, अनीयर्, शतृ, शानच्, क्त, क्तवतु, क्त्वा, ल्यप्, तुमुन्।<br>(2) **तद्धिताः** - मतुप्, इन्, ठक्, त्व, तल्।<br>(3) **स्त्री-प्रत्ययौ** - टाप्, ङीप्। | **1×5=5** |
| **प्रश्न-7.** | **त्रयाणां कालबोधक-शब्दानां संस्कृत-शब्देषु परिवर्तनम् ।**<br>**(सामान्य-सपाद-सार्ध-पादोन)** | **1×3=3** |
| **प्रश्न-8.** | **सन्धि-कार्यम् (त्रयाणां पदानां सन्धिं/सन्धि-विच्छेदं वा)**<br>(1) **स्वर-सन्धिः =>** दीर्घ, गुण, वृद्धि, यण्, अयादि, पूर्वरूप, पररूप, संयोग इत्यादयः।<br>(2) **व्यञ्जन-सन्धिः =>** श्चुत्व, ष्टुत्व, जशत्व, तुक् आगम, अनुस्वार, परसवर्ण, अनुनासिक, वर्गीय-प्रथम-अक्षराणां तृतीयवर्णे पञ्चमवर्णे वा परिवर्तनम् इत्यादयः।<br>(3) **विसर्ग-सन्धिः =>** विसर्गस्य स्थाने उत्त्वं, रत्वं, लोपः, शकारः, षकारः, सकारः च। | **1×3=3** |
| **प्रश्न-9.** | **वाच्य-परिवर्तनम् (केवलं लट्लकारे)** | **1×3=3** |
| **प्रश्न-10.** | **पद-परिचयः (चतुर्णां शब्दानां धातूनाञ्च पद-परिचयः)** | **½×4=2** |
| **प्रश्न-11.** | **चतुर्णां लिङ्गाधारित-सङ्ख्या-वाचक-पदानां चयनम् (एकतः दश-पर्यन्तम्)** | **½×4=2** |
| **प्रश्न-12.** | **समासाः (वाक्येषु चतुर्णां समस्त-पदानां विग्रहः विग्रह-पदानां च समासः)** | **½×4=2** |

| | | |
|---|---|---|
| | **(1) तत्पुरुषः** (विभक्तिः, नञ्, उपपदः),<br>**कर्मधारयः तत्पुरुषः**(विशेषण- विशेष्यम्, उपमानउपमेयम्),<br>**द्विगुः तत्पुरुषः** च।<br>**(2) द्वन्द्वः** (इतरेतरः, समाहारः, एकशेषः)<br>**(3) बहुव्रीहिः** (समानाधिकरणम्)<br>**(4) अव्ययीभावः** (अनु, उप, सह, निर्, प्रति, यथा) | |
| **प्रश्न-13.** | **चतुर्णां अशुद्ध-वाक्यानां संशोधनम् ।**<br>**(वचन-लिङ्ग-पुरुष-विभक्ति-लकार-विशेषण- विशेष्याधारितम्)** | **½×4=2** |
| **प्रश्न-14.** | **अव्यय-पदानि**<br>**(वाक्येषु चतुर्णाम् अव्ययपदानां प्रयोगः)**<br>अपि, इति, अलम्, इव, एव, एवम्, उच्चैः, नीचैः, कदा, एकदा, अधः, उपरि, समन्ततः, परितः, सर्वतः, कुतः, नूनम्, पुरा, मा, अत्र-तत्र, यत्र-कुत्र, यथा-तथा, यदा-तदा, यावत्-तावत्, यदि-तर्हि, कदापि, तथापि, खलु, ननु, किल, सह, इतस्ततः, यत्, विना, सहसा, अद्य, श्वः, ह्यः, अधुना, अन्तः, बहिः, वृथा, मिथ्या, किमर्थम्, शनैः-शनैः, पुनः-पुनः, भूयो-भूयः इत्यादयः। | **½×4=2** |
| | **खण्ड 'ङ'**<br>**पठित-अवबोधनम्**<br>**("शेमुषी-द्वितीयो भागः" इति संस्कृत-पाठ्यपुस्तकम् अधिकृत्य पठित-अवबोधनम्)**<br>**{पाठ्यसामग्री- प्रथमपाठतः दशमपाठ-पर्यन्तम्}** | **20 अङ्काः** |
| **प्रश्न-15.** | **पठित-गद्य-पद्य-आधारित-अवबोधनकार्यम्** | |
| **(अ)** | **40-50 शब्द-परिमितः एकः पठित-गद्यांशः**<br>**(संस्कृत-पाठ्यपुस्तके निर्धारित-पाठ्यसामग्रीम् अधिकृत्य)**<br>**(1)** एकपदेन प्रश्नोत्तर-द्वयम्<br>**(2)** पूर्णवाक्येन प्रश्नोत्तरम्<br>**(3)** भाषिक-कार्यम् (निर्देशानुसार-प्रश्नोत्तर-द्वयम्) | <br><br>**1×2=2**<br>**1×1=1**<br>**1×2=2** |
| **(आ)** | **एकः पठितः पद्यांशः (संस्कृत-पाठ्यपुस्तके निर्धारित-पाठ्यसामग्रीम् अधिकृत्य)**<br>**(1)** एकपदेन प्रश्नोत्तर-द्वयम्<br>**(2)** पूर्णवाक्येन प्रश्नोत्तरम्<br>**(3)** भाषिक-कार्यम् (निर्देशानुसार-प्रश्नोत्तर-द्वयम्)<br><br>**भाषिक-कार्यम् =>**<br>वाक्ये क्रियापद-चयनं, कर्तृक्रिया-अन्वितिः, विशेषण-विशेष्य-अन्वितिः, सञ्ज्ञास्थाने सर्वनाम-प्रयोगः, सर्वनामस्थाने सञ्ज्ञा-प्रयोगः, पर्यायपदं विलोमपदं वा दत्त्वा अनुच्छेदे प्रदत्तं पद-चयनं, पद-परिचयः, सन्धिं/सन्धि-विच्छेदं वा, समस्त-पदानां विग्रहः विग्रह-पदानां च समासः, प्रकृति-प्रत्ययौ, उपसर्ग-चयनञ्च। | <br><br>**1×2=2**<br>**1×1=1**<br>**1×2=2** |

| | | |
|---|---|---|
| **प्रश्न-16.** | **संस्कृत-पाठ्यपुस्तके निर्धारित-पाठ्यसामग्रीम् अधिकृत्य हिन्दी-भाषायाम् अनुवादः।** | |
| **(अ)** | **एकस्य गद्यांशस्य हिन्दी-भाषायाम् अनुवादः। (रूपरेखा+प्रसङ्ग+सरलार्थः)** | **(½+½+2=3)** |
| **(आ)** | **एकस्य पद्यांशस्य हिन्दी-भाषायाम् अनुवादः। (रूपरेखा+प्रसङ्ग+सरलार्थः)** | **(½+½+2=3)** |
| **प्रश्न-17.** | **रेखाङ्कित-पदमधिकृत्य चतुर्णां वाक्यानां प्रश्ननिर्माणम्।** | **½×4=2** |
| **प्रश्न-18.** | **संस्कृत-पाठ्यपुस्तके निर्धारित-पाठ्यसामग्र्याः अभ्यासमधिकृत्य चतुर्णां पदानां मेलनम् । अभ्यासेषु एतादृशाः अनेके विषयाः सन्ति, तद्यथा-**<br>> पर्यायपदानां (समानार्थक-पदाना) मेलनम्।<br>> विलोमपदानां (विपरीतार्थक-पदाना) मेलनम्।<br>> विशेषण-विशेष्यानां मेलनम्।<br>> कोष्ठकात् चित्वा पदानाम् अर्थः।<br>> शुद्ध-कथनानां समक्षम् "आम्" इति तथा अशुद्ध-कथनानां समक्षम् "न" इति लेखनम्।<br>> कोष्ठकात् शुद्धं विकल्पं विचित्य रिक्तस्थानपूर्तिः।<br>**एतेषु विषयेषु कमपि एकं विषयम् अधिकृत्य परीक्षा-पत्र-निर्माता प्रश्नं प्रष्टुं शक्नोति।** | **½×4=2** |

*********************************************************************************

**प्रश्ननिर्माणकर्ता अशुद्धिसंशोधकश्च**

**आचार्य नरेश मलोटिया**
**टीजीटी-संस्कृतम्**

**राजकीय-उत्कृष्ट-वरिष्ठ-माध्यमिक-विद्यालयः (कन्या) नादौनः**
**डाकगृहम्- नादौनः, मण्डलम्- नादौनः, जनपदः- हमीरपुरः**
**(हिमाचल प्रदेशः)- 177033**

**दूरवाणी- सङ्केतः- 9817707260, 8351007260**
**अणु-सङ्केतः ggsssnadaun@rediffmail.com**

**डॉ. अमन शर्मा**
**टीजीटी-संस्कृतम्**

**राजकीय-उच्च-विद्यालयः चामुक्खा**
**डाकगृहम्- चामुक्खा, मण्डलम्- रक्कड़ः, जनपदः- काङ्गड़ा**
**(हिमाचल प्रदेशः)- 177033**

**दूरवाणी- सङ्केतः- 8894337243, 8219973147**
**अणु-सङ्केतः ghschamukha123@gmail.com**

**आदर्शप्रश्नपत्र-प्रारूपम्**

**29, 30 अगस्त, 2024**

**कक्षा दशमी**

**विषयः संस्कृतम्**

## <u>स्तरानुसार- अङ्कविभाजनम्</u>

| स्तरः | प्रश्नसंख्या | अङ्काः | योग | प्रतिशत |
|---|---|---|---|---|
| सरलः | 1 (1,2,3,12,13,14,15,16) | 8 | | 40% |
| | 2 (1) | 2 | | |
| | 3(1) | 1 | | |
| | 7 | 3 | | |
| | 8 | 3 | | |
| | 11 | 2 | | |
| | 13 | 2 | | |
| | 14 | 2 | | |
| | 15अ (1) | 2 | | |
| | 16आ (1) | 3 | | |
| | 17 | 2 | | |
| | 18 | 2 | | |
| | योग | 32 | 32 | |
| मध्यमः | 1 (6,7,8,9,10) | 5 | | 30% |
| | 2(2) | 1 | | |
| | 3(2) | 1 | | |
| | 4 | 5 | | |
| | 6 | 5 | | |
| | 13 | 2 | | |
| | 15अ (2) आ (2) | 1+1=2 | | |
| | 16(अ) | 3 | | |
| | योग | 24 | 24 | |
| कठिनः | 1 (4,5,11), | 3 | | 30% |
| | 2(3) | 2 | | |
| | 3(3,4) | 2+1=3 | | |
| | 5 | 5 | | |
| | 9 | 3 | | |
| | 10 | 2 | | |
| | 12 | 2 | | |
| | 15अ (3), आ (3) | 2+2=4 | | |
| | योग | 24 | 24 | |
| | पूर्णाङ्क | 80 | 80 | |